13-08-2020

संस्कृतसामान्यम् । उपशास्त्री - I

अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"निपानमिव मण्डूकाः, सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसम्पदः ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → मन्थरः नामकः कच्छपः स्वमित्रे काकमूषकौ धनसञ्चयस्य गुणदोषान् श्रावयति ।

अन्वयः → (यथा) मण्डूकाः निपानम् इव, अण्डजाः पूर्णम् सरः (प्राप्नुवन्ति), (तथा) विवशाः सर्वसम्पदः सोद्योगं नरम् आयान्ति ।

शब्दार्थः व्याकरणञ्च → मण्डूकाः = दर्दुरः । निपानमिव → निपानम् + इव → (नि + √पा + ल्युट्) = उपकूपजलाशयम्
अण्डजाः → अण्डात् जायते इति = अण्डोत्पन्नाः जीवाः, पक्षिणः ।
सरः - √सृ + अच् = सरोवरम्, जलाशयम् ।
विवशाः - वि + √विश् + अच् = अनियन्त्रिताः । सर्वसम्पदः - सम्+√पद्+
क्विप् = सर्वा सम्पदः = सर्वधनानि । सोद्योगं = उद्योगेन सह, तम् =
उत् + √युज् + घञ् = प्रयत्नम्, परिश्रमम् । नरम् = जनम् ।
आयान्ति = गच्छन्ति ।

तात्पर्यः → मण्डूकादयः उभयचराः पक्षिणश्च जलं विना न वसन्ति यतोहि जलपूर्णस्थाने तेषां जीवनानि संभवन्ति अतएव ते अनायासेन तत्र गच्छन्ति वसन्ति च तद्वत् सर्वधनानि उद्योगिनं पुरुषं प्राप्नुवन्ति ।

विशेषः → अर्थान्तरन्यासालङ्कारः अस्मिन् श्लोके ।

13-08-2020

डॉ० निर्मल कुमार झा, (सं०प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

13-08-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । कृत् प्रत्ययः ।

तृन्, तृच्, क्तिन्, घञ् प्रत्ययान्त शब्दाः →

| धातु + | तृन् | तृच् | क्तिन् | घञ् |
|---|---|---|---|---|
| √कृ → | कर्तृ / कर्ता | कर्ता | कृतिः | कारः |
| √नी → | नेतृ | नेता | नीतिः | नायः |
| √पठ् → | | | | पाठः |
| √दा → | दातृ | दाता | | |
| √गम् → | | | गतिः | |
| √लिख् → | | | | लेखः |
| √पच् → | | | | पाचः, पाकः |
| √श्रु → | | | श्रुतिः | |
| √भू → | | | भूतिः | भावः |
| √दुह् | दुहितृ | दुहितृ / दुहिता | | |
| √पच् | | | | पाकः |

| | यत् | तुमुन् | |
|---|---|---|---|
| √पा → | पायः | पातुम् | कृ + तुमुन् = कर्तुम् |
| √दा → | देयः | दातुम् | क्री + " = क्रेतुम् |
| √नी → | नेयः | नेतुम् | खाद् + " = खादितुम् |
| √दृश् → | दृश्यः | द्रष्टुम् | गम् + " = गन्तुम् |
| √श्रु → | श्रव्यः | श्रोतुम् | पच् + " = पक्तुम् |
| √जि → | जेयः | जेतुम् | वद् + " = वदितुम् |
| प्र+√नम्+ → | प्रणम्यः | | पठ् + " = पठितुम् |
| | | | त्यज् + " = त्यक्तुम् |

13-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः) ।
शा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

13-08-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । कृत् प्रत्ययाः ।

तृन्, तृच्, क्तिन्, घञ् प्रत्ययान्त शब्दाः →

| धातु + | तृन् | तृच् | क्तिन् | घञ् |
|---|---|---|---|---|
| √कृ → | कर्तृ / कर्ता | कर्ता | कृतिः | कारः |
| √नी → | नेतृ | नेता | नीतिः | नायः |
| √पठ् → | | | | पाठः |
| √दा → | दातृ | दाता | | |
| √गम् → | | | गतिः | |
| √लिख् → | | | | लेखः |
| √पच् → | | | | पाचः, पाकः |
| √श्रु → | | | श्रुतिः | |
| √भू → | | | भूतिः | भावः |
| √दुह् | दुहितृ | दुहितृ / दुहिता | | |
| √पच् | | | | पाकः |

| | यत् | तुमुन् |
|---|---|---|
| √पा → | पेयः | पातुम् |
| √दा → | देयः | दातुम् |
| √नी → | नेयः | नेतुम् |
| √दृश् → | दृश्यः | द्रष्टुम् |
| √श्रु → | श्रव्यः | श्रोतुम् |
| √जि → | जेयः | जेतुम् |
| प्र+√नम्+ → | प्रणम्यः | |

कृ + तुमुन् = कर्तुम्
क्री + " = क्रेतुम्
खाद् + " = खादितुम्
गम् + " = गन्तुम्
पच् + " = पक्तुम्
वद् + " = वदितुम्
पठ् + " = पठितुम्
त्यज् + " = त्यक्तुम्

13-08-2020

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्यः) ।
शा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।

अनिवार्य पत्रम्
व्याकरणछात्र हेतवः।

शास्त्री II

13-08-2020

रघुवंशम् । श्लोकव्याख्या ।

"प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तथैवम् ।
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → कविरत्र हेमाङ्गदं राजानं प्रति इन्दुमत्याः निःस्पृहदृष्टिविशेषं सोपमं वर्णयति ।

अन्वयः → आकृतिलोभनीया विदर्भराजावरजा तया एवं प्रलोभिता अपि नीत्या दूरकृष्टा लक्ष्मीः प्रतिकूलदैवात् जनात् इव तस्मात् अपावर्तत ।

व्याख्या → आकृतिलोभनीया → स्वरूपाकर्षणीया । विदर्भराजावरजा → विदर्भराजस्य अवरं जाता या सा = इन्दुमती । तया = सुनन्दया । एवम् = इत्थम् । प्रलोभिताऽपि = प्रेरितापि । नीत्या = पुरुषकारेण । दूरकृष्टा = दूरमानीता । लक्ष्मीः = श्रीः । प्रतिकूलदैवात् → प्रतिकूलं दैवं यस्य सः = विपरीतभाग्यात् । जनात् = व्यक्तेः । इव = यथा । तस्मात् = हेमाङ्गदात् । अपावर्तत = प्रतिनिवृत्ता ।

तात्पर्यः → इन्दुमती हेमाङ्गदं परित्यज्य तथैव पुरो गता, यथा विरुद्धभाग्यात् पुरुषार्थकारकं पुरुषं परित्यज्य लक्ष्मीः प्रयाति ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तिश्च ।

(हस्ताक्षर) 13-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।